This Question Paper consists of 41 questions and 11 printed pages.
अस्मिन् प्रश्नपत्रे 41 प्रश्नाः एवम् 11 मुद्रित पृष्ठाः सन्ति।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No.
कोड नं. **67/S/A/S**

SET **A**

# SANSKRIT

# संस्कृतम्

# (209)

**Day and Date of Examination :**

**( परीक्षादिवसः दिनाङ्कश्च )** ______________________

**Signature of Invigilators :**

**( निरीक्षकयोः हस्ताक्षरम् )** 1. ______________________

2. ______________________

**सामान्य अनुदेशाः –**

1. सर्वेषां प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु।
2. प्रश्नपत्रिकां पठितुं 15 निमेशाः दत्ताः। प्रश्नपत्रिका 02.15 मध्यह्ने समये दीयते। 02.15 समयतः 02.30 समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः।
3. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
4. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्ष्यणीयम्।
5. वस्तुनिष्ठप्रश्नेषु (क), (ख), (ग) वा (घ) विकल्पेषु किमपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखेत्।
6. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
7. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
8. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड नं. **67/S/A/S-A** अवश्यमेव लेखनीया।

# SANSKRIT

# संस्कृतम्

# (209)

**समयः - होरात्रयम् ]** **[ पूर्णाङ्काः - 100**

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे -

**[A]** भागे **20**, **[B]** भागे **7**, **[C]** भागे **5**, **[D]** भागे **5**, **[E]** भागे **4** इति आहत्य **41** प्रश्नाः सन्ति।

(ii) **समे** प्रश्नाः **अनिवार्याः**। तत्र वैकल्पिकभागेषु **एकः** एव समाधेयः।

(iii) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अंङ्काः x प्रश्नाः पूर्णाङ्काः) इति अङ्काः दीयन्ते।

(iv) **A** भागे प्र.सं. **1** तः **20** पर्यन्तं बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्त विकल्पेषु एकस्य एव प्रयासः करणीयः।

(v) **B** भागे प्र.सं. **21** तः **27** पर्यन्तं वस्तुनिष्ठप्रश्नाः। प्र.सं. **21** तः **25** **चतुरङ्कात्मकाः** एवम् प्र.सं. **26** तः **27** **पञ्चअंङ्कात्मकाः** अस्ति। ते यथानिर्देशं समाधेयाः।

(vi) **C** भागे प्र.सं. **28** तः **32** पर्यन्तं अतिलघुत्तरीयाः प्रश्नाः, प्रत्येकम् **अंकद्वयात्मकाः** सन्ति। ते यथानिर्देशं समाधेयाः।

(vii) **D** भागे प्र.सं. **33** तः **37** पर्यन्तं अनतिदीर्घोत्तरीयाः प्रश्नाः, प्रत्येकम् **चतुरङ्कात्मकाः** सन्ति। ते यथानिर्देशं **50** तः **80** शब्दानां परिधिमध्ये समाधेयाः।

(viii) **E** भागे प्र.सं. **38** तः **41** पर्यन्तं दीर्घोत्तरीयाः प्रश्नाः, प्रत्येकम् **पञ्चअंङ्कात्मकाः** सन्ति। ते यथानिर्देशं **80** तः **100** शब्दानां परिधिमध्ये समाधेयाः।

(ix) समेषां प्रश्नानामुत्तराणि संस्कृतभाषया एव लेख्यानि।

(x) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढ़संख्या नूनं लेख्या।

(xi) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमांकलेखनं सर्वथा वर्जितमस्ति।

(xii) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

(xiii) निरीक्ष्यताम् यत् प्रश्न पत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारंभे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा।

(xiv) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

## भाग - A

विंशति प्रश्नानां युक्तं विकल्पं चिनुत– **1x20=20**

**1.** द्वयोः कश्चिदेकः प्रश्नः समाधेयः–

(i) चत्वारि कस्य वर्धन्ते ?

(क) सूर्योपसेविनः (ख) वृद्धोपसेविनः

(ग) देवोपसेविनः (घ) विद्योपसेविनः

**अथवा**

(ii) कुलं केन रक्ष्यते ?

(क) वित्तेन (ख) वृत्तेन

(ग) कीर्तनेन (घ) धनेन

**2.** पिपीलिका केन सफला भवति ?

(क) धनबलेन (ख) युक्तिबलेन

(ग) मनोबलेन (घ) शक्तिबलेन

**3.** द्वयोः कश्चिदेकः समाधेयः -

(i) घटानां स्थापनेन के जाताः ?

(क) गर्ताः (ख) गह्वराः

(ग) छिद्राः (घ) तडागाः

**अथवा**

(ii) अहं मनोयोगेन पठिष्यामि इति कस्य कथनम् ?

(क) वानरस्य (ख) बोपदेवस्य

(ग) मकरस्य (घ) बालकस्य

**4.** कः मत्स्यः विनश्यति ?

(क) अनागतविधाता (ख) प्रत्युत्पन्नमतिः

(ग) यद्भविष्यः (घ) आगतविधाता

**5.** द्वयोः कश्चिदेकः समाधेयः ?

(i) सुरक्षितं कदा विनश्यति ?

(क) दैवरक्षितम् (ख) दैवहतम्

(ग) रोगहतम् (घ) दुर्घटनाग्रस्तम्

**अथवा**

(ii) 'आयुःक्षये अन्यत्रगतानामपि मृत्युः भविष्यति' इति कः उक्तवान् ?

(क) अनागतविधाता (ख) यद्भविष्यः

(ग) प्रत्युत्पन्नमतिः (घ) जलाशयः

6. पञ्चतन्त्रग्रन्थस्य लेखक: क: ?

(क) तुलसीदास: (ख) कालिदास:

(ग) बाल्मीकि: (घ) विष्णुशर्मा

7. द्वयो: कश्चिदेक: प्रश्न: समाधेय:–

(i) 'पितृपैतामहिकम्' इति कस्य विशेषणम्?

(क) मत्स्य: (ख) सर:

(ग) अनाथ: (घ) मत्स्यजीवी

**अथवा**

(ii) मत्स्यजीविनाम् आगते यद्भविष्यस्य किमभवत्?

(क) विनाशम् (ख) रक्षणम्

(ग) पलायनम् (घ) सुखम्

8. राम: सुग्रीवेण सह कुत्र अमिलत्?

(क) हिमालयपर्वते (ख) ऋष्यमूकपर्वते

(ग) विंध्याचलपर्वते (घ) दक्षिणांचलपर्वते

9. द्वयो: कश्चिदेक: प्रश्न: समाधेय: –

(i) भरद्वाजस्य आश्रम: कस्या: तीरे आसीत्?

(क) यमुनाया: (ख) गङ्गाया:

(ग) सरस्वतीनद्या: (घ) कृष्णाया:

**अथवा**

(ii) दशरथस्य राजधानी का आसीत्?

(क) अयोध्या (ख) मथुरा

(ग) काशी (घ) प्रयाग:

10. पितृशब्दस्य षष्ठी एकवचने किं रूपम्?

(क) पितरस्य (ख) पितु:

(ग) पित्रा (घ) पित्रे

11. द्वयो: कश्चिदेक: समाधेय:–

(i) शूलपाणि: इति कस्य नाम?

(क) इन्द्रस्य (ख) विष्णो:

(ग) शिवस्य (घ) सूर्यस्य

**अथवा**

(ii) वराहमिहिरेण कस्य ग्रन्थस्य रचना कृता?

(क) लीलावती (ख) सिद्धान्तशिरोमणि:

(ग) पञ्चसिद्धान्तिका (घ) दशगीतिका

**12.** तृणात् बहुतरं किम्?

(क) दमः (ख) चिन्ता

(ग) लोभः (घ) व्याधिः

**13.** द्वयोः कश्चिदेकः समाधेयः–

(i) शक्रः रथस्य अग्रे कानि पश्यति?

(क) पक्षिनीडानि (ख) गरुड़नीडानि

(ग) आम्रफलानि (घ) भयदीनमुखानि

**अथवा**

(ii) देवासुरयोः मध्ये कुत्र युद्धमभवत्?

(क) असुरालये (ख) समुद्रतीरान्ते

(ग) समुद्रे (घ) समरे

**14.** 'जितेन्द्रियः' इत्यत्र कः समासः?

(क) तत्पुरुषः (ख) कर्मधारयः

(ग) बहुव्रीहिः (घ) अव्ययीभावः

**15.** द्वयोः कश्चिदेकः समाधेयः –

(i) 'बुद्धिमान्' इत्यत्र किं प्रातिपदिकम्?

(क) बुद्धिम् (ख) बुद्धिमत्

(ग) बुद्धिः (घ) बुद्धः

**अथवा**

(ii) 'व्यायामात्' इति कीदृशं रूपम्?

(क) प्रथमैकवचनान्तम् (ख) पञ्चम्येकवचनान्तम्

(ग) तृतीयैकवचनान्तम् (घ) सप्तम्यैकवचनान्तम्

**16.** 'हिताशी' इत्यत्र सन्धि विच्छेदः कः?

(क) हिता + शी (ख) हि + ताशी

(ग) हित + आशी (घ) हित + शी

17. द्वयोः कश्चिदेकः समाधेयः -

(i) 'गीताञ्जलिः' मूलतः कस्यां भाषायां लिखितमस्ति ?

(क) हिन्दी (ख) संस्कृतम्

(ग) बंगाली (घ) मैथिली

**अथवा**

(ii) 'गीताञ्जलिः' इति केन पुरस्कारेण पुरस्कृता ?

(क) साहित्य अकादमी (ख) ज्ञानपीठ पुरस्कारेण

(ग) नोबेल पुरस्कारेण (घ) सार्वभौम पुरस्कारेण

18. अद्यावधि - इत्यत्र सन्धिविच्छेदः कार्यः -

(क) अद्या + वधि (ख) अद्य + अवधि

(ग) अद्य + वधि (घ) अद्य + आवधि

19. द्वयोः कश्चिदेकः समाधेयः -

(i) 'शरीरायासजननं कर्म' किमुच्यते ?

(क) व्यायामः (ख) संयमः

(ग) विहंगमः (घ) अभ्यंगः

**अथवा**

(ii) धृत्वा इति रूपम् कथं निष्पन्नम् ?

(क) ध्रि + क्त्वा (ख) धृ + क्त्वा

(ग) धृ + त्वा (घ) धर् + क्त्वा

20. उचितेन शब्देन पूरयतु -

__________ सह यथोचितं व्यवहरिष्यति दुर्गाध्यक्षः।

(क) त्वम् (ख) त्वया

(ग) तुभ्यम् (घ) तव

## भाग – B

**21.** उचितविकल्पान् मेलयत – **1x4=4**

| **'क' स्तम्भः** | | **'ख' स्तम्भः** |
|---|---|---|
| (i) बहुमत्स्यः | (a) | गृहे विनश्यति |
| (ii) अरक्षितं तिष्ठति | (b) | ह्रदः |
| (iii) कृतप्रयत्नोऽपि | (c) | सुखमेधेते |
| (iv) द्वावेतौ | (d) | दैवरक्षितम् |

**अथवा**

| **'क' स्तम्भः** | | **'ख' स्तम्भः** |
|---|---|---|
| (i) रामायणम् | (a) | रावणेन हृता |
| (ii) अगस्त्यस्य आश्रमः | (b) | चित्रकानना |
| (iii) सीता | (c) | गोदावरीतीरे |
| (iv) यमुना | (d) | आदिकाव्यम् |

**22.** अधोलिखितेषु वाक्येषु सत्यम् असत्यं वा लिखत – **1x4=4**

(i) लीलावती भास्कराचार्यस्य पुत्री नासीत्।

(ii) आर्यभटस्य नाम्ना उपग्रहाः निर्मिताः।

(iii) भास्कराचार्यः प्रसिद्धः ज्योतिर्विद् आसीत्।

(iv) जलाशये एकोऽपि मत्स्यःनासीत्।

**अथवा**

(i) देवागारे पिहितद्वारे कम् भजसे ?

(ii) या शकुन्तला युष्मासु अपीतेषु जलं न पीतवती।

(iii) त्यज कुसुमं, त्यज सन्तानम्।

(iv) चन्दनवृक्षः न हरति सन्तापम्।

**23.** उदाहरणानु सारम् अधोलिखितानाम् शब्दानां विभक्तिवचनसहितं रूपं लिखत – (किमपि चतुष्टयम्) **1x4=4**

| | **शब्दाः** | **विभक्तिः** | **वचनम्** | **रूपम्** |
|---|---|---|---|---|
| **उदा.** | मित्र | प्रथमा | बहुवचनम् | मित्राणि |
| (i) | पुष्प | द्वितीया | बहुवचनम् | |
| (ii) | लता | तृतीया | एकवचनम् | |
| (iii) | मनस् | द्वितीया | बहुवचनम् | |
| (iv) | भ्रातृ | द्वितीया | एकवचनम् | |
| (v) | मित्र | षष्ठी | एकवचनम् | |

**अथवा**

| | | | | |
|---|---|---|---|---|
| (i) | अस्मद् | षष्ठी | बहुवचनम् | |
| (ii) | लव | तृतीया | एकवचनम् | |
| (iii) | शत्रु | षष्ठी | एकवचनम् | |
| (iv) | विद्वस् | प्रथमा | बहुवचनम् | |
| (v) | मातृ | प्रथमा | बहुवचनम् | |

**24.** उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत – **1x4=4**

(i) गावः दुग्धं घृतं च __________ (यच्छ् लट्)

(ii) गोदानेन पुण्यं __________ (भू लट्)

(iii) भवान् चिन्तां न __________ (कृ विधिलिङ्)

(iv) महात्मा गांधी सत्यबलेन विजयं __________ (प्र + आम् + लङ्)

**अथवा**

(i) संन्यासिनः हिमालये तपः __________ (कृ + लट्)

(ii) बोधिद्रुमतले मुनिः __________(विराज् + लट्)

(iii) विद्वान् सर्वत्र __________(पूज् लट् आत्मने पद)

(iv) कुमारः जृंभकास्त्रेण __________ (प्र + हृ(हर्) + लट्)

**25.** सन्धिं सन्धिच्छेदं च कृत्वा सन्धेः नामेल्लेखं कुरुत – **1x4=4**

(i) दीप + अग्निः __________

(ii) मम + अर्थे __________

(iii) सु + आगतम् __________

(iv) __________ शैलेन्द्रः

**अथवा**

(i) __________+ आस्ते कुत्रास्ते।

(ii) यत् + इह __________

(iii) सत् + आचरणम् __________

(iv) गुणोत्तमः __________

**26.** रेखाङ्कितपदमनुसृत्य प्रश्ननिर्माणं कुरुत – (कानिचन पञ्च) **1x5=5**

(i) तत्र सत्याग्रहाश्रमः आस्ति।

(ii) तस्मिन् गृहे एकः वृद्धः तिष्ठति।

(iii) मुनिः मौनेन तिष्ठति।

(iv) नार्यः सदा पूज्यन्ते।

(v) नद्याः तीरे भरद्वाजाश्रमः अस्ति।

(vi) जले ष्ठीवनं न कुर्यात्।

**27.** अधोलिखितेषु प्रकृति प्रत्यय विभाजनं कुरुत – **1x5=5**

पश्यन्, स्मृत्वा, गन्तुम्, श्रुतः, आहूय

**अथवा**

प्रकृति प्रत्ययं संयोज्य शब्दनिर्माणं कुरुत –

भुज् + क्त्वा __________। गम् + शतृ(पुं.) __________। कृ + तव्यत् __________।
रक्ष् + अनीयर् __________। भक्ष् + क्त __________।

## भाग – C

पञ्चानां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत – **2x5=10**

**28.** तुरीयाश्रमसेवी क: ? क: तं सम्बोधयति ?

**29.** दौवारिका: कस्य आज्ञां न प्रतीक्षन्ते ? तेभ्य: कस्य आज्ञा श्रेष्ठतरा ?

**30.** ईश्वरस्य निवास: कुत्र अस्ति ? स: कीदृशजनाय स्निह्यति।

**अथवा**

ईश:क्व अस्ति इति पाठस्य संदेशं लिखत।

**31.** अभ्यङ्गेन के लाभा: भवन्ति ?

**32.** समुद्रवत् सज्जनानाम् स्वभावे किं वैशिष्ट्यं वर्तते ?

## भाग – D

पंच प्रश्नान् अनतिदीर्घोत्तरै: समाधत्त – **4x5=20**

**33.** 'तेजसां हि न वय: समीक्ष्यते' इति नाट्यांशकर्तु: परिचयं संक्षेपेण लिखत।

**34.** 'सत्याग्रहाश्रम:' इति पाठस्य सारांशं लिखत।

**35.** 'शरीरमाद्यं खलु धर्मसाधनम्' पाठे व्यायामस्य के लाभा: उक्ता: ? तेषां वर्णनम् स्वभाषया कुरुत।

**36.** 'यक्षयुधिष्ठिरसंवाद:' कस्मात् ग्रंथात् उद्धृत: अस्ति ? तत्र यक्षद्वारा पृष्ठानां प्रश्नानां यानि उत्तराणि युधिष्ठिरेण प्रदत्तानि तानि संक्षेपेण लिखत।

**37.** स्वपाठ्यपुस्तकाद् स्मृतौ श्लोकद्वयौ लिखत।

**अथवा**

'मित्र विषये' यक्षयुधिष्ठिरसंवादे यद् वर्णितमस्ति तल्लिखत।

## भाग – E

**38.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत– **5**

कालस्य रथ: त्वरितेन वेगेन गच्छति, तस्य रथ: स्वर्णपारिजातेन कल्पलताया: शाखाभिश्च–अलंकृतोऽस्ति। स: मुक्तहस्तेन कनकं प्रददाति चरणोदकं वा वितरति। यदि कोऽपि जागृत: अस्ति तदा स्वभण्डारम् मणि–माणिक्यै: पूरयेत्, अथवा यदि कोऽपि कामयेत् तदा वरदानगंगाजलेन आत्मानमभिषिक्तं करोतु। ये महत: शत्रो: आलस्यस्य बाहुपाशे सन्ति तेषां जीवनं अभिशापै: पूर्यते, सुख–सौविध्यै: वञ्चितास्ते नरकमयं जीवनं यापयन्ति।

जीवनेऽस्मिन् प्रतिक्षणं कालरूपेण परमात्मना मानवाय प्रदत्तं महद्धनं वर्तते। यदि वयं समयस्य माधुर्यं रुचिना न पिबाम: तदा काल एव तस्य रसं पीत्वा अस्मान् नीरसान् करिष्यति। सत्यं कथ्यते काल: पिबति तद्रसम्।

(क) कालस्य रथ: कथं गच्छति ?

(ख) स सर्वेभ्य: किं वितरति ?

(ग) कस्य कृपया वरदानस्य प्राप्ति: भवति ?

(घ) केषां जीवनं अभिशाप पूर्णमस्ति ?

(ङ) कालस्य उपेक्षायाम् आनन्दरसं क: गृह्णाति ?

**39.** एकम् विषयमधिकृत्य मञ्जूषा साहाय्येन दशवाक्येषु एकमनुच्छेदं लिखत – **5**

**सन्तोषः**

| **मञ्जूषा** |
|---|
| सन्तोषः, एव, मानवस्य सुखस्य आधारः, धनजनबलैः पूरितः जनः, सन्तोषेण, वास्तविकं सुखं लभते, चिरसुखं च अनुभवति–अत उक्तम् सन्तोष एव पुरुषस्य परं निधानम्। सन्तुष्टः एव सुखी |

**अथवा**

**विद्याधनम्**

| **मञ्जूषा** |
|---|
| महद्धनमस्ति, कोऽपि चोरयितुं न शक्नोति न वा भ्रातृभिः बण्ट्यते, राज्ञा अपह्रियते, विद्यया, विद्वान् सर्वत्र पूज्यते, भूषितः सर्वत्र मानं लभते–विद्याधनं सर्वधनप्रधानम्। |

**40.** पित्रे पुस्तकक्रयणार्थं धनं प्रेषयितुं पत्रमेकं लिखत। **5**

**41.** अधोलिखितम् चित्रं दृष्ट्वां मञ्जूषा साहाय्येन दशवाक्यानि लिखत – **5**



| |
|---|
| विद्यालयस्य प्रांगणे पादकंदुक प्रतियोगिता भवति, महता उत्साहेन छात्राः क्रीडन्ति, विजयितो भूत्वा परस्परं मिलन्ति मिथः प्रशंसन्ति, अहो अतिसुंदरम् |

- o O o -